# শ্রীবেঙ্কটেশস্তোত্রম্

{॥ শ্রীবেঙ্কটেশস্তোত্রম্ ॥}

বেঙ্কটেশো বাসুদেবঃ প্রদ্যুম্নোঽমিতবিক্রমঃ ।
সঙ্কর্ষণোঽনিরুদ্ধশ্চ শেষাদ্রিপতিরেব চ ॥ ১॥

জনার্দনঃ পদ্মনাভো বেঙ্কটাচলবাসনঃ ।
সৃষ্টিকর্তা জগন্নাথো মাধবো ভক্তবৎসলঃ ॥ ২॥

গোবিন্দো গোপতিঃ কৃষ্ণঃ কেশবো গরুডধ্বজঃ ।
বরাহো বামনশ্চৈব নারাযণ অধোক্ষজঃ ॥ ৩॥

শ্রীধরঃ পুণ্ডরীকাক্ষঃ সর্বদেবস্তুতো হরিঃ ।
শ্রীনৃসিংহো মহাসিংহঃ সূত্রাকারঃ পুরাতনঃ ॥ ৪॥

রমানাথো মহীভর্তা ভূধরঃ পুরুষোত্তমঃ ।
চোळপুত্রপ্রিযঃ শান্তো ব্রহ্মাদীনাং বরপ্রদঃ ॥ ৫॥

শ্রীনিধিঃ সর্বভূতানাং ভযকৃদ্ভযনাশনঃ ।
শ্রীরামো রামভদ্রশ্চ ভববন্ধৈকমোচকঃ ॥ ৬॥

ভূতাবাসো গিরাবাসঃ শ্রীনিবাসঃ শ্রিযঃপতিঃ ।

Stotram Digitalized By Sanskritdocuments.org

অচ্যুতানন্তগোবিন্দো বিষ্ণুর্বেঙ্কটনায়কঃ ॥ ৭॥

সর্বদেবৈকশরণং সর্বদেবৈকদৈবতম্ ।

সমস্তদেবকবচং সর্বদেবশিখামণিঃ ॥ ৮॥

ইতীদং কীর্তিতং যস্য বিষ্ণোরমিততেজসঃ ।

ত্রিকালে যঃ পঠেন্নিত্যং পাপং তস্য ন বিদ্যতে ॥ ৯॥

রাজদ্বারে পঠেদ্ঘোরে সঙ্গ্রামে রিপুসঙ্কটে ।

ভূতসর্পপিশাচাদিভযং নাস্তি কদাচন ॥ ১০॥

অপুত্রো লভতে পুত্রান্ নির্ধনো ধনবান্ ভবেত্ ।

রোগার্তো মুচ্যতে রোগাদ্ বদ্ধো মুচ্যেত বন্ধনাত্ ॥ ১১॥

যদ্যদিষ্টতমং লোকে তত্তৎপ্রাপ্নোত্যসংশযঃ ।

ঐশ্বর্যং রাজসম্মানং ভক্তিমুক্তিফলপ্রদম্ ॥ ১২॥

বিষ্ণোর্লোকৈকসোপানং সর্বদুঃখৈকনাশনম্ ।

সর্বৈশ্বর্যপ্রদং নৃণাং সর্বমঙ্গলকারকম্ ॥ ১৩॥

মাযাবী পরমানন্দং ত্যক্ত্বা বৈকুণ্ঠমুত্তমম্ ।

স্বামিপুষ্করিণীতীরে রমযা সহ মোদতে ॥ ১৪॥

কল্যাণাদ্ভুতগাত্রায কামিতার্থপ্রদাযিনে ।

শ্রীমদ্বেঙ্কটনাথায শ্রীনিবাসায তে নমঃ ॥ ১৫॥

বেঙ্কটাদ্রিসমং স্থানং ব্রহ্মাণ্ডে নাস্তি কিঞ্চন ।

বেঙ্কটেশসমো দেবো ন ভূতো ন ভবিষ্যতি ॥ ১৬॥

॥ ইতি ব্রহ্মাণ্ডপুরাণে ব্রহ্মনারদসংবাদে

শ্রীবেঙ্কটেশস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by Dhananjay Naniwadekar nani345 at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Venkateshwara Stotram 2 Lyrics in Bengali PDF
% File name : venkateshastotram.itx
% Location : doc_vishhnu
% Author : Vyasa
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dhananjay Naniwadekar nani345 at gmail.com
% Proofread by : Dhananjay Naniwadekar nani345 at gmail.com
% Description-comments : brahmANDapurANe brahmanAradasaMvAde
% Latest update : Dec. 14, 2014
% Send corrections to : Sanskrit@cheerful.com

% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website